This question paper consists **8** pages. Of this **42** questions.
अस्मिन् प्रश्नपत्रे **8** मुद्रित पृष्ठा: च सन्ति । **द्विचत्वारिंशत्** प्रश्ना: सन्ति ।

Roll No.
अनुक्रमाङ्क:
अङ्केषु

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

# SANSKRIT
# संस्कृतम्
# (209)

**Code No.** **50/S/A/S**
**कोड नं.**

**SET** **A**

Day and Date of Examination
(परीक्षादिवस: दिनाङ्कश्च) ..........................................................................

Signature of Invigilators 1. ..........................................
(निरीक्षकहस्ताक्षरद्वयम्)

2. ..........................................

**सामान्य अनुदेशा:**

1. अनुक्रमाङ्क: प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीय: ।

2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति । प्रश्ना: क्रमानुसारमेव सन्ति ।

3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर-पुस्तिकामध्ये लिखेत् ।

4. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

6. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **50/S/A/S, Set** **A** अवश्यं लेखनीया ।

# SANSRIT

## (संस्कृतम्)

## (209)

**समय : होरात्रयम् ]** **[पूर्णाङ्का: – 100**

**निर्देशा**: – (1) अस्मिन् प्रश्नपत्रे द्विचत्वारिंशत् प्रश्ना: सन्ति ।

(2) प्रत्येकम् प्रश्नस्य समक्षम् अङ्का: सूचिता: ।

(3) **सर्वे** प्रश्ना: अनिवार्या: ।

**खण्ड-क**

1. एतत् शौचम् पञ्चशौचेषु न परिगण्यते **1**

(A) मन:शौचम् (B) कुलशौचम्

(C) वस्त्रशौचम् (D) वाक्शौचम्

2. बोपदेव: विद्यालयात् बहि: निरगच्छत् यत: **1**

(A) स: अन्यत्र पठितुमिच्छति स्म । (B) स: परीक्षायामसफल: जात: ।

(C) स: कूपं द्रष्टुमिच्छति स्म । (D) स: शिलाखण्डे गर्तान् गणयितुमिच्छति स्म ।

3. एतत् प्रीतिलक्षणं नास्ति **1**

(A) ददाति (B) प्रतिगृह्णाति

(C) उपदिशति (D) भुंक्ते

4. एष: शुन: गुण: नास्ति **1**

(A) अल्पभोजी (B) सुनिद्र:

(C) स्वल्पसन्तुष्ट: (D) स्वामिभक्त:

5. केन किं न भवति ? **1**

(A) वाचा भाषणम् (B) श्रोत्राभ्यां श्रवणम्

(C) मनसा ध्यानम् (D) नेत्राभ्यां श्वसनम्

6. अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम् इत्यत्र बलिनः इति पदे का विभक्तिः ? **1**

(A) पञ्चमी (B) षष्ठी

(C) सप्तमी (D) तृतीया

7. एषा <u>सा</u> दृश्यते सीते ! राजधानी पितुर्मम – इत्यत्र रेखाङ्कितपदे का विभक्तिः ? **1**

(A) पञ्चमी (B) षष्ठी

(C) प्रथमा (D) चतुर्थी

8. लीलावती भास्कराचार्यस्य पुत्री <u>आसीत्</u>, इत्यत्र 'आसीत्' इति पदे कः धातुः, कश्च लकारः ? **1**

(A) आस् धातुः लट् लकारः (B) अस् धातुः लङ् लकारः

(C) अस् धातुः लोट् लकारः (D) आस् धातुः लङ् लकारः

9. आनन्दयति इति पदस्य बहुवचने किं भवति ? **1**

(A) आनन्दायति (B) आनन्दयेते

(C) आनन्दयतः (D) आनन्दयन्ति

10. मे चरणौ पुरतः _______ । इति अत्र रिक्तस्थाने किं क्रियापदं भविष्यति ? **1**

(A) प्रवर्तते (B) प्रवर्त्तिष्यते

(C) प्रवर्तेते (D) प्रवर्तन्ते

11. 'यदहं न यास्यामि । भवद्भ्यां च यत् प्रतिभाति तत्कर्तव्यम्' – इति अत्र 'अहम्' 'भवद्भ्याम्' च इति सर्वनाम पदद्वयं केभ्यः प्रयुक्तम् ? **1 + 1 = 2**

12. (i) स्वधर्मवर्तित्वम् किम् उच्यते ? **1 + 1 = 2**

(ii) मनसः दमनं किमुच्यते ?

13. सात्त्विकं दानं कीदृशं भवति ? **2**

14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत –

दौवारिक: – (संन्यासिनो हस्तं घृत्वा) इतस्तावत् सत्यं कथय, कस्त्वम् ? कुत: आयात:, केन वा प्रेषित: ?

संन्यासी – (स्मित्वेव) अथ त्वं मां मन्यसे ?

दौवारिक: – कस्याप्यन्यस्य वा गूढचरं मन्ये । तदादेशं पालयिष्यामि प्रभुवर्यस्य ।

संन्यासी – त्यज ! नाहं पुनरायास्यामि । दयस्व, दयस्व ।

**प्रश्ना**: (i) दौवारिक: संन्यासिनं कं मन्यते ?

(ii) संन्यासी दयायै कं प्रार्थयति ?

(iii) 'मन्यसे' इति क्रियापदस्य कर्तृपदं किम् ? **1 × 3 = 3**

15. अधोलिखितयो: एकस्य चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन लिखत । **5**

कण्व: **अथवा** शकुन्तला

16. तस्मात्सखा त्वमसि यन्मम तत्तवैव ।

इत्यत्र (i) किं क्रियापदम् ?

(ii) 'त्वम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ? **1 × 2 = 2**

17. (i) वृक्षाणां फलानि केभ्य: भवन्ति ?

(ii) चन्दनवृक्ष: कै: विहीन: भवति ? **1 + 1 = 2**

18. शरीरायासजननम् कर्म व्यायाम उच्यते ।

लाघवं कर्मसामर्थ्यं दीप्ताऽग्निर्मेदस: क्षयम् ।

– इति व्यायामेन किं लाभद्वयं भवति ? **1 + 1 = 2**

19. नाप्सु मूत्रं पुरीषं वा, ष्ठीवनं वा समुत्सृजेत् ।

अमेध्यालिप्तमन्यद्वा लोहितं वा विषाणि वा ।।

– इति पद्ये 'रक्तम्', 'जलेषु' इति अर्थद्वये किं पदद्वयं प्रयुक्तम् ? **1 + 1 = 2**

20. "ध्यायन् क्लेशान् स्वबन्धूनां, तद्धितैकपरायण: ।

विराजते मुनिर्बुद्धो, बोधिद्रुमतले यथा ।।" इति पद्ये –

(i) किं क्रियापदम् ? **1**

(ii) किं कर्तृपदम् ? **1**

(iii) तेषां हिताय एव कृतप्रयत्न: इति कृते किं पदमत्र प्रयुक्तम् ? **1**

21. अधोलिखितपद्यांशस्य भावार्थे रिक्तस्थानानि पूरयत । **1 × 3 = 3**

क्रोध: सुदुर्जय: शत्रुर्लोभो व्याधिरनन्तक: ।
सर्वभूतहित: साधुरसाधुर्निर्दय: स्मृत: ।।

भावार्थ :

क्रोधस्य उपरि __(i)__ दुर्लभ: । लोभस्य कदापि __(ii)__ न भवति । सज्जन: सर्वेषां __(iii)__ हितं करोति । दुर्जन: निर्दय: भवति ।

22. (i) ईशस्तिष्ठति <u>वर्षातपयो:</u> ।

(ii) सलीलमीश: सृजति <u>भुवम्</u> । इति

रेखाङ्कितपदद्वयमाधृत्य प्रश्ननिर्माणं कुरुत । **1 + 1 = 2**

23. (i) प्राणानां श्रेष्ठता कथं सिध्यति ?

(ii) शक्र: किमर्थं मातलिं रथं परावर्तयितुं कथयति ? **1 + 1 = 2**

24. (i) पञ्चतन्त्रम्, इति ग्रन्थस्य लेखक: क: ? **1 + 1 = 2**

(ii) जातककथाया: क: पाठ: युष्माकं पाठ्यपुस्तके सङ्कलित: ?

25. तत: प्राणा: निर्गन्तुं प्रारभन्त । तस्मिन्नेव क्षणे सर्वाणि वाक्प्रभृतीनि इन्द्रियाणि पीडितानि अभवन् । कष्टेन च प्राणम् अवदन्-भगवन् : मा गच्छ । त्वमेव अस्मासु श्रेष्ठ: । त्वमेव अस्माकं नियन्ता ।

**प्रश्ना:**

(1) प्राणानां निर्गमनस्य प्रारम्भे कानि पीडितानि अभवन् ?

(2) 'त्वमेव अस्मासु श्रेष्ठ:' इति कानि कं वदन्ति ?

(3) 'प्रारभन्त' इति क्रियापदस्य कर्तृपदं किम् ? **1 × 3 = 3**

26. लीलावती भास्कराचार्यस्य पुत्री आसीत् । पुत्रीं शिक्षमाण: स: तस्या: कृते मनोविनोदं युक्तं गणितं काव्यरूपेण अरचयत् । स: पशुपक्षिभ्रमरहंसादिमाध्यमेन गणितस्य जटिलप्रश्नान् अरचयत् तेषां समाधानं चापि अकरोत् । अतोऽयं ग्रन्थ: लीलावती इति नाम्ना प्रसिद्ध: ।

**प्रश्ना:**

(1) भास्कराचार्य: कं ग्रन्थमरचयत् ?

(2) 'लीलावती' कस्य पुत्री आसीत् ?

(3) भास्कराचार्य: गणितस्य प्रश्नान् केषां माध्यमेन रचितवान् ? **1 × 3 = 3**

27. कस्यचिदेकस्य पाठस्य सारांशं लिखत :

(1) प्रेरणा

(2) भारतीयविज्ञानम्

(3) त्याज्यं न धैर्यम् **1 × 5 = 5**

## खंड-ख

## अनुप्रयुक्त व्याकरणम्

28. रेखाङ्कितपदानां सन्धिच्छेदं कृत्वा लिखत – **1 × 2 = 2**

(1) तस्मात्काय<u>विशुद्ध्यर्थम्</u> आदौ स्नानं विधीयते ।

(2) मन्दिरेषु <u>भगवद्दर्शनं</u> कुर्वन्ति ।

29. सन्धिं कृत्वा लिखत – **1 × 3 = 3**

(1) <u>किम् + नु</u> हित्वा न शोचति ?

(2) क: शत्रु: + दुर्जय: पुंसाम् ?

(3) क्षमा च का परा प्र + उक्ता ?

30. अधोलिखित वर्णेषु किं वर्णद्वयम् मूर्ध्ना प्रोच्यते ? **1 + 1 = 2**

छ्, त्, ऋ, ष्,

31. निम्नलिखितवाक्ययो: रिक्तस्थानानि समुचितसर्वनामपदाभ्यां पूरयत : **1 × 2 = 2**

(1) माता भूमि: पुत्र: _______ पृथिव्या: (अस्मद्)

(2) _______ मे सन्तु गृहे सदा । (तत्, स्त्री)

32. रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत – **1 × 3 = 3**

(i) __3__ गुणा: सन्ति गर्दभे ।

(ii) __4__ गुणान् कुक्कुट: शिक्षयति ।

(iii) __2__ चटके वृक्षे तिष्ठत: ।

33. (i) गुणै: परवशीभूता: <u>व्यवर्धन्त</u> सहस्रश: । **1 + 1 = 2**

(ii) हन्त ! <u>प्रतिनिवर्तन्ते</u> अस्माकं सैनिका: ।

रेखाङ्कितपदयो: क: धातु:, कश्च लकार: ?

34. अधोलिखितवाक्ययो: कोष्ठे प्रदत्तधातुना सह निर्मितेन उचितेन क्रियापदेन रिक्तस्थानं पूरयत । **1 × 3 = 3**

(i) जलं ________ रक्षितम् । (रक्ष्, लट्)

(ii) स्वार्थान्धा जना: अपकारं ________ । (कृ, लट्)

(iii) तस्मात् ________ पादपा: । (घ्रा, लट्)

35. समुचित समस्तपदं लिखत **1 × 2 = 2**

(i) शिशूनां प्रेमी

(ii) महान् आत्मा यस्य स:

36. अधोलिखितयोः समस्तपदयोः विग्रहं लिखत **1 + 1 = 2**

(i) शकुन्तला पतिगृहं याति ।

(ii) तदिदं सरस्तीरम् ।

37. रेखाङ्किततस्थाने किं पदं भविष्यति ? **1 + 1 = 2**

(i) यदि त्वं मां _______ न प्रतिरुन्धेः । (प्र + विश् + शतृ)

(ii) त्वं सुवर्णं _______ शक्नुयाः । (वि + धा + तुमुन्)

38. रिक्तस्थानपूर्तिं कुरुत – **1 + 1 = 2**

(i) त्वं _______ बहिः आगच्छ । (देवालय)

(ii) ईशः _______ सह तिष्ठति । (तत्, पुं.)

## खंड-ग

## रचनाकौशलम्

39. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत **1 × 5 = 5**

सदाचारिपुरुषाणां व्यक्तित्वमनुपमं भवति । ते समुद्रवत् गम्भीराः, हिमालयवत् उच्चाः, धरणीव सहनशीलाः सूर्यवत् तीव्राः, चन्द्रवत् शीतलाश्च भवन्ति । ते यत् कथयन्ति तस्य पालनमपि कुर्वन्ति । "मनस्येकं, वचस्येकं, कर्मण्येकम्" इति तेषां व्यवहारः भवति । अतएव अस्माकं महर्षिमिः कथितम्-आचारः परमो धर्मः । अस्माकं पूर्वजाः सदाचारिणः आसन् । महर्षिणा मनुना अपि कथितम् - आचारात् लभते ह्यायुः । आचारः सर्वधर्माणां मूर्धानमधिरोहति । सदाचारी जनः देवैरपि पूज्यते । सदाचरणेन एव रामः कृष्णः महात्मा बुद्धः, महावीरस्वामी च अद्यापि यशःशरीरेण जीवन्ति । अतः चरित्रमेव सर्वदेव संरक्षणीयम् ।

**प्रश्नाः**

(i) सदाचारिणां व्यवहारः मनसि वचसि कर्मणि च कथं भवति ?

(ii) आचारात् किं किं लभ्यते ?

(iii) किं सर्वदेव संरक्षणीयम् ?

(iv) 'आसन्' इति क्रियापदस्य कर्तृपदं किम् ?

(v) 'अनुपमम्' इति विशेषणस्य विशेष्यं किम् ?

40. अधोलिखितविषयम् अधिकृत्य मञ्जूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लेख्यानि **1 × 5 = 5**

'वसुधैव कुटुम्बकम्'

| **मञ्जूषा** |
|---|
| उदारचरितानां, सम्पूर्णजगत्, परिवारः, लघुचेतसां, मम, तव इति गणना, आत्मवत्, सर्वान् मनुष्यान्, परहिते निरताः, धारयन्ति, जीवनम्, वयं सर्वे, पुत्राः, एकस्य, परमात्मनः, देवाः, दानवाः । |

41. भवान् सौम्यः । भवतां मित्रं राकेशः दूरदर्शनात् प्रसारिते नाटके भागं गृहीतवान्, सर्वोत्तम-अभिनयकृते पुरस्कारं च प्राप्तवान् । तं प्रति अभिनन्दनपत्रं मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु । **1 × 5 = 5**

जयपुरत :

तिथि :

प्रिय वयस्य राकेश

नमस्ते ।

'हृत्परिवर्तनम्' नाम नाटके त्वम् __(i)__ कृतवान्, __(ii)__ च प्राप्तवान् इति मया ज्ञातम् । विगत शनिवासरे __(iii)__ नववादनकाले मया दूरदर्शनतः तस्य __(iv)__ प्रसारणम् अपि दृष्टम् । अतीव __(v)__ जाता । अभिनन्दयामि त्वाम् ।

तव मित्रम्

सौम्य :

| **मञ्जूषा** |
|---|
| पुरस्कारम्, संध्यायाम्, नाटकस्य, अभिनयम्, शोभनम्, प्रसन्नता |

42. अधोलिखितं चित्रं मञ्जूषा प्रदत्तशब्दानां सहायतया पञ्चवाक्येषु वर्णयत । **1 × 5 = 5**



| **मञ्जूषा** |
|---|
| षष्ठी पूजनस्य, अवसरः, वृक्षस्य अधः, जनाः, बालकाः, महिलाः, स्नानं, जलमध्ये, स्थिताः, केचन, पूजां, कुर्वन्ति, जले जनानां, छाया, पवित्रं जलं, स्वच्छम् |

---